# अथ श्री भागवतैकादशस्कंधार्थ-निरूपणकारिकाः ।

श्रीगणेशाय नमः ।

निरोधलीलामुक्तानां मुक्तिस्तदनुवर्ण्यते ।
मुक्तानामाश्रयः कृष्णो नान्येषामिति शास्त्रतः ॥१॥
अनन्यत्वं तदा सिध्येन्न त्वध्यासो मनागपि ।
प्रपंचविस्मृतिः कृष्णासक्तिश्चाध्याससंभवे ॥ २ ॥
भजनानंदसिद्ध्यर्थं द्विरूपत्वमपीष्यते ।
एकत्वे शिथिलाध्यासो निरोधेन भविष्यति ॥ ३ ॥
नाशो ज्ञानेन मुक्तस्य सम्यगाश्रयसिद्धये ।
अवतारवदेवात्र निरूपणमपीष्यते ॥ ४॥
यथाधिकारबोधाय सर्वा लीलाः फलावधि ।
मुक्तिर्हित्वाऽन्यथारूपस्वरूपेण व्यवस्थितिः ॥ ५ ॥
लीला भगवतः सेयमाश्रयो भगवानतः ।
विषयाः सात्त्विका जीवानिर्गुणाश्च द्विरूपतः ॥ ६ ॥
वसुदेवोद्धवौ तत्र विषयौ सत्त्वनिर्गुणौ ।
अन्यथारूपमीशस्य माययेति हरेः कृपा ॥ ७ ॥
यैर्धर्मास्ते हि वक्तव्या अन्यथारूपनाशकाः ।
भक्ता एव हि तज्ज्ञाः स्युः सर्वज्ञः केवलं हरिः ॥८॥

स्वरूपेण व्यवस्था तु सर्वज्ञेनैव नान्यथा ।
आज्ञाकृतिर्निर्भयत्वं नैवाभ्यामुच्यते स्फुटम् ॥ ९ ॥
जीवस्य यादृशं रूपं तेन नित्यं व्यवस्थितिः ।
यदौपनिषदं ज्ञानं प्रमया नेह तत्कथा ॥१०॥
व्यवस्थाश्रयसिद्धौ तु न तृतीयेऽपि सूचितम् ।
द्वितीयेऽपि स्फुटं नोक्तं केवलौपनिषत्त्वतः ॥११॥
अतः सर्वज्ञतासिद्धौ सर्वनिर्णयमुक्तवान् ।
आदिमध्यावसानेषु मुख्यलीलोच्यते हरेः ॥१२॥
हेतूद्यमफलैर्द्वेधा समग्रा न स्वतःफलाः ।
अतस्तु प्रथमेऽध्याये लीला भगवतोच्यते ॥१३॥
हेतुरूपा ससामान्या प्रश्नः पूर्वविनिश्चितः ॥१४॥

इति श्रीवल्लभाचार्यविरचिता एकादशस्कंधार्थनिरूपण-
कारिकाः समाप्ता ।

# अथ श्रीकृष्णप्रेमामृतम् ।

श्रीकृष्णाय नमः ।

एकदा कृष्णविरहाद्ध्यायंती प्रियसंगमम् ।
मनोबाष्पनिरासाय जल्पंतीदं मुहुर्मुहुः ॥ १ ॥
कृष्णः कृष्णेंदुरानंदो गोविंदो गोकुलोत्सवः ।
गोपालो गोपगोपीशो वल्लवेंद्रो व्रजेश्वरः ॥ २ ॥

१ मनोव्यथा निरा. पा० इति मम प्रतिभाति.